# AMRITA VIDYALAYAM
## HALF YEARLY EXAMINATION 2017 - '18

**Class : X** **Marks : 80**
**Time : 3 hrs**

# संस्कृतम्

निर्देशाः
1. प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
खण्डः क अपठित अवबोधनम् - 10 अङ्काः
खण्डः ख रचनात्मककार्यम् - 15 अङ्काः
खण्डः ग अनुप्रयुक्त व्याकरणम् - 25 अङ्काः
खण्डः घ पठित अवबोधनम् - 30 अङ्काः
2. सर्वे प्रश्नाः अनिवार्याः।
3. प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
4. प्रश्नसंख्या अवश्यमेव लेखनीया।
5. उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्डः क (अपठित अवबोधनम्)

**1. अधोलिखितम् अनुच्छदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

सज्जनानां सम्पर्कः सत्संगतिः भवति। अस्मिन् संसारे सज्जनाः दुर्जनाः चापि भवन्ति। दुर्जनस्य संगतिः दुस्संगतिः भवति। मनुष्यः संगतिं विना न तिष्ठति। या काऽपि संगतिः भवेत् इति अनिवार्यम्, परम् उभयोः संगत्योः महद् अन्तरम्। सत्संगतिः पोषिका दुस्संगतिश्च नाशिका इति भेदः। कोऽपि विचारवान् नाशं न इच्छति, पोषणं तु इच्छति, तेन सत्संगतिः एव वरतरा।

सज्जनपुरुषाः कैश्चिद् गुणैः सज्जनाः भवन्ति नाऽन्यथा। तस्मात् सज्जनसंगत्या मनुष्ये गुणानां कृते स्पृहा वर्धते। ते गुणान् अभिनन्दन्ति। तेन च शनैः शनैः सत्संगत्या मनुष्ये गुणाः निविशन्ति दुर्गुणाश्च एकैकं बहिः गच्छन्ति। सद्गुणसम्पन्नो नरः शरीरेण, मनसा, बुद्धया इन्द्रियैश्च स्वस्थतरो जायते। तेन च तस्य आयुष्यं वर्धते। तस्य यशः उत्तरोत्तरं वर्धते। सत्संगेन प्रपुष्टो जनः शनैः शनैः लोकनेता जायते। कथितं च- "संसर्गजाः दोषगुणाः भवन्ति"।

**I. एक पदेन उत्तरत।** **2**

i) कः संगतिं विना न तिष्ठति?
ii) विचारवान् किं न इच्छति?
iii) कस्य संगतिः दुस्संगतिः भवति?
iv) कीदृशो नरः स्वस्थतरो जायते?

**II. पूर्णवाक्येन उत्तरत।** **4**

i) सद्गुणसंपन्नो नरः कीदृशः भवति?

ii) उभयोः संगत्योः कः भेदः?

**III. प्रदत्त विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।** **2**

i) अनुच्छेदे 'ते' इति कर्तृपदस्य किं क्रियापदम् आगतम्?

(क) भवन्ति (ख) इच्छति (ग) अभिनन्दन्ति (घ) कथितम्

ii) अनुच्छेदे 'वरतरा' इति विशेष्यपदस्य किं विशेषणं प्रयुक्तम्?

(क) बहिः (ख) सत्संगतिः (ग) वर्धते (घ) नाशम्

iii) 'दुर्जनाः' पदस्य विपरीतार्थकं लिखत।

(क) सम्पर्कः (ख) गुणान् (ग) मनुष्याः (घ)सज्जनाः

iv) 'तिष्ठति' क्रियापदस्य कर्ता कः?

(क) सज्जनाः (ख) संसारे (स) मनुष्यः (घ)पोषिका

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **2**

## खण्डः ख (रचनात्मक कार्यम्)

**2. भवान् सुरेशः छात्रावासे वसति। शारदीये अवकाशे भवतां विद्यालये संस्कृतसम्भाषण शिबिरं प्रचलिष्यति। अतः भवान् गृहं न गमिष्यति इति सूचयन् पितरं प्रति लिखितं पत्रं मञ्जूषा पदसहायतया पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत।** **5**

नर्मदा छात्रावासः
नवोदयविद्यालयः
(i) ----------

परमपूज्यपितृमहाभागः,
(ii) ----------

अहम् अत्र कुशली। तत्रापि भवन्तः सर्वे (iii) ---------- इति मन्ये। अत्र मम पठनं (iv) ---------- प्रचलति। अर्धवार्षिकी परीक्षा (v) ----------। मम विद्यालये शारदीये अवकाशे (vi) --------- प्रचलिष्यति। अतः अहम् अवकाशदिनेषु (vii) ---------- आगन्तुं न शक्नोमि। भवतां दर्शनेन अहं वञ्चितः भवामि इति खेदः, तथापि शिबिरेण मम (viii) ---------- भविष्यति इति नास्ति सन्देहः। (ix) ---------- अपि मम वन्दनानि। स्वकीयं समाचारं सूचयन्तु इति।

(x) ---------- पुत्रः
सुरेशः

मञ्जूषा

| |
|---|
| सम्यक्, ज्ञानवर्धनं, कुशलिनः, गृहं, भवदीयः, संस्कृतसम्भाषणशिबिरं, जयपुरतः, समाप्ता, मातृचरणयोः, सादरवन्दनानि |

**3.** **मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत।** **10**



मञ्जूषा

| |
|---|
| बाला:, उत्तमम्, योगाभ्यासं, भ्रामरी प्राणायामं, अनेके छात्रा:, प्रसीदन्ति, प्राचीना पद्धति: |

अथवा

**"महाभारतम्" इति विषयम् अधिकृत्य मञ्जूषापदसाहाय्येन पञ्च संस्कृतवाक्यानि लिखत।**

मञ्जूषा

| |
|---|
| श्रीकृष्ण:, कौरवा:, पाण्डवा:, युद्धस्य, कारणं, दुर्योधन:, द्रौपदी, कर्ण:, अर्जुन:, भीम:, भीष्मपितामह: |

## खण्ड: ग (अनुप्रयुक्त व्याकरणम्)

**4.** **अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सन्धिं विच्छेदं वा कुरुत।** **5**

i) क: <u>शुचिरिह</u>? यस्य मानसं शुद्धम्।

ii) <u>तच्छरेण</u> तरुशाखा छिन्ना अभवत्।

iii) <u>वाणी + एका</u> समलङ्करोति।

iv) <u>गुरौ + आगते</u> छात्रा उत्तिष्ठन्ति।

v) हे गुरो! मम <u>शम् + काम्</u> निवारयतु।

**5.** **अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत।** **5**

i) <u>सूपकारा:</u> भोजनं पचन्ति।

(क) सूपं कुर्वन्ति इति ते (ख) सूपं करोति इति

(ग) सूपान् कुर्वन्ति (घ) सूपकारा: कुर्वन्ति इति

ii) धीगुणाः अष्ट सन्ति।

(क) धियात् गुणाः (ख) धीयस्य गुणाः (ग) धियाः गुणाः (घ) धियः गुणाः

iii) तस्य चक्षुः नीलम् उत्पलम् इव अस्ति।

(क) नीलोत्पलम् (ख) नीलोत्पलानि (ग) नीलस्य उत्पलम् (घ) नीलोत्पले

iv) चतुर्णांयुगानां समूहः किं कथ्यते?

(क) चतर्युगानां समूहः (ख) चत्वारः युगसमूहः (ग) चतुर्युगम् (घ) चत्वारि युगं

v) इदमस्त्रम् अपाण्डवाय अस्ति।

(क) पाण्डवस्य न (ख) पाण्डवेन न (ग) न पाण्डवस्य (घ) न पाण्डवाय

**6. अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु प्रकृति प्रत्ययौ संयोज्य विभज्य वा लिखत।** **5**

i) मे दग्धाः घोटकाः कथं रक्षणीयाः?

(क) रक्ष् + अनीया (ख) रक्ष् + अनीयर् (ग) रक्ष + अनीया (घ) रक्ष् + अनीयाः

ii) शश + इन् किरणसमाः सज्जनाः एव भवन्ति।

(क) शशिन् (ख) शशी (ग) शशिनः (घ) शशिनी

iii) वाक्पटुः धैर्यवान् सभायामप्यकातरः।

(क) धैर्य + मतुप् (ख) धैर्य + वतुप् (ग) धैर्य + मत् (घ) धैर्य + वत्

iv) पुस्तकालयस्य पुस्तकानि बहिः न नी + तव्यत्।

(क) नेतव्यानि (ख) नीतव्यानि (ग) नेतव्यम् (घ) नीतव्यम्

v) वीराः अभ्युदये क्षमा + मतुप् भवन्ति।

(क) क्षमामन्तः (ख) क्षमावन्ताः (ग) क्षमामन्ताः (घ) क्षमावन्तः

**7. अधोलिखितेषु वाक्येषु विकल्पेभ्यः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत।** **5**

i) हेयम् -------- च किं भवति?

(क) एव (ख) अपि (ग) पुरा (घ) इतस्ततः

ii) ईश्वरः -------- व्यापकः।

(क) वृथा (ख) सर्वत्र (ग) सदा (घ) विना

iii) --------- दशरथः नाम नृपः आसीत्।

(क) अधुना (ख) अत्र (ग) पुरा (घ) इदानीम्

iv) रात्रौ कुक्कुराः -------- भ्रमन्ति।

(क) इतस्ततः (ख) अधुना (ग) तत्र (घ) यथा

v) -------- एषः छात्रः अस्ति।

(क) तत्र (ख) अत्र (ग) नूनम् (घ) पुरा

**8. अधोलिखिते संवादे वाच्यानुसारं उचितं पदं विकल्पेभ्यः चित्वा वाक्यपूर्तिं कुरुत।** **3**

मोहनः - कमले! किं त्वया प्रदर्शनी i) ----------?

(क) दृश्यसे (ख) दृश्यते (ग) दृष्यसे (घ) दृश्ये

कमला - आम्! ii) --------- प्रदर्शनीम् एव द्रष्टुं गच्छामि।

(क) त्वंम् (ख) अहं (ग) त्वया (घ) मया

मोहनः - अधुना यावत् त्वया कथं न गता?

कमला - अहं स्वपरीक्षायाः सज्जायां व्यस्ता आसीत्।

मोहनः - अतएव त्वया अधुना iii) ----------।

(क) गम्यते (ख) गम्येते (ग) गम्यसे (घ) गम्यन्ते

**9. अधोलिखितेषु वाक्येषु समयानुसारं समुचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत।** 2

i) श्रीमोहनः (8.45) वादने दूरदर्शनं पश्यति।

(क) पादोन अष्टवादने (ख) पादोन नव (ग) सपाद नव (घ) पादोन सप्त

ii) सः (11:15) वादने रामायणस्य पाठं करोति।

(क) पादोन एकादश (ख) सपाद एकादश (ग) सार्ध एकादश (घ) पादोन दश

iii) सः (1:00) वादने श्रीरामस्य आरतीं करोति।

(क) एकवादने (ख) पादोन द्वादश (ग) सपाद एक (घ) पादोन द्वि

iv) सः (1.30) वादने ब्राह्मणाय भोजनं ददाति।

(क) पादोन द्वि (ख) सार्धैक (ग) सार्ध द्वि (घ) सपादैक

## खण्डः घ (पठित अवबोधनम्)

**10.अ. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

तस्य वचनम् अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन् - "भो! किमिदम् उच्यते? न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार - तिक्त - कषाय - कटु - रूक्ष फलानि भक्षयिष्यामः।" तच्छ्रुत्वा साश्रुनयनो यूथपतिः सगद्गदम् उक्तवान् - "रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। अहं तु वनं गच्छामि।"

**I. एकपदेन उत्तरत।** 2

i) यूथपतिः कुत्र गन्तुम् उद्यतः भवति?

ii) कपयः केन उद्धताः आसन्?

**II. पूर्णवाक्येन उत्तरत।** 2

कपयः कान् त्यक्त्वा वनं गन्तुं न इच्छति स्म?

**III. निर्देशानुसारम् उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत।** 2

i) "साश्रुनयनः" इति कस्य पदस्य विशेषणम्?

(क) तच्छ्रुत्वा (ख) यूथपतेः (ग) श्रुत्वा (घ) मेषस्य

ii) सुपरिणामम् इत्यस्य किं विलोमपदमत्र प्रयुक्तम्?

(क) कुपरिणाम् (ख) दुष्परिणामम् (ग) सुकरम् (घ) दुष्करम्

iii) 'जानीथ' इति क्रियापदस्य कर्तृपदं किम्?

(क) अस्य (ख) यूयम् (ग) त्वम् (घ) अहम्

iv) 'अहम्' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) कपये (ख) मेषाय (ग) यूथपतये (घ) अश्वाय

**आ. अधोलिखितं पद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत।**

"शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।
ऊहापोहार्थविज्ञानं तत्वज्ञानं च धीगुणाः"॥

**I. एकपदेन उत्तरत।** **2**

i) धियः चतुर्थः गुणः कः?

ii) तत्वज्ञानं धियः कतमो गुणो वर्तते?

**II. पूर्णवाक्येन उत्तरत।** **2**

अत्र श्लोके धियः कति गुणाः वर्णिताः सन्ति?

**III. निर्देशानुसारं समुचितमुत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **2**

i) 'श्रोतुम् इच्छा' - इत्यर्थे किं पदमागतम्?

(क) श्रवणम् (ख) शुश्रूषा (ग) ग्रहणम् (घ) धारणम्

ii) 'बुद्धेः' - इति पदस्य कः पर्यायः श्लोके आगतः?

(क) धियः (ख) ऊहः (ग) विज्ञानं (घ) तथा

iii) 'दानम्' - इत्यस्य कः विपर्ययः अत्र लिखितः?

(क) धारणं (ख) ऊहः (ग) ग्रहणं (घ) अपोहः

iv) श्लोकात् एकम् अव्ययं चित्वा लिखत।

(क) गुणाः (ख) तथा (ग) ज्ञानं (घ) धीः

**इ. अधोलिखितं नाट्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत।**

शक्रः - राजन्! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि। देव! रवि-राशि-तारामण्डल भूषितं जगत् एतत् कथमिव पश्येयं चक्षुर्हीनः।

राजा - भगवन्! भवन्मनोरथं पूरयित्वा आत्मानम् अनुग्रहीतुं कर्तुम् इच्छामि।

शक्रः - यदि भवान् प्रीतः तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्।

राजा - भो मित्र! किमेकेन चक्षुषा अहं भवते चक्षुद्वयमेव प्रयच्छामि।

**I. एकपदेन उत्तरत।** **2**

i) शक्रः कस्य दानम् इच्छति?

ii) लोकयात्रा कीदृशी भवेत्?

**II. पूर्णवाक्येन उत्तरत।** **2**

राजा कम् अनुगृहीतुं कर्तुम् इच्छति?

**III. निर्देशानुसारं समुचितम् उत्तरं प्रदत्त विकल्पेभ्यः चित्वा लिखत।** **2**

i) चक्षुष्मान् - इति पदस्य विलोमपदं किं प्रयुक्तम्?

(क) चक्षुषः (ख) चक्षुर्हीनः (ग) अनुगृहीतुं (घ) पश्येयम्

ii) अहं भवते चक्षुर्द्वयमेव ----- अत्र 'अहम्' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) शक्राय (ख) राज्ञे (ग) भवते (घ) दानवीराय

iii) पश्येयम्-इति क्रिया: कर्तृपदं किम्?

(क) शक्र: (ख) अहं (ग) त्वं (घ) राजा

iv) 'मम लोकयात्रा निर्बाधा भवेत्' - अत्र किं विशेषणपदं प्रयुक्तम्?

(क) मम (ख) लोकयात्रा (ग) निर्बाधा (घ) भवेत्

**11. मञ्जूषात: समुचितं पदं चित्वा अधोलिखित श्लोकयो: अन्वयं पूरयत।** **4**

क. अपूर्व: कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥

अन्वय:- भारति, तव अयं i) ---------- कोऽपि ii) ----------- विद्यते। य: व्ययत: iii) --------- आयाति iv) ---------- च क्षयम् आयाति।

ख. नलिनीदलगतजलवत्तरलं किम्? यौवनं धनं चायु:।
कथय पुन: के शशिन: किरणसमा:? सज्जना: एव ॥

अन्वय:- i) ----------- गत जलवत् तरलं किम्? यौवनं, धनं, ii) --------- च। पुन: कथय iii) ---------- किरणसमा: के? iv) ----------- एव भवन्ति।

मञ्जूषा

| |
|---|
| आयु:, अपूर्व:, शशिन:, कोश:, वृद्धिम्, नलिनीदल, सञ्चयात्, सज्जना: |

**12. रेखाङ्कितपदानां स्थाने प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत।** **4**

i) कपिभि: गुरुजनानाम् उपदेशा: अवधीरिता:।

ii) प्राणिनां मूढता निद्रा कथिता।

iii) त्यागी एव सर्वव्यसनविनाशे दक्ष:।

iv) त्वत्त: एकस्य चक्षुष: दानम् इच्छामि।

**13. रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत।** **4**

i) नृपस्य स्वेषु गात्रेषु निरासक्ति: अभवत्।

(क) देहेषु (ख) अङ्गेषु (ग) नेत्रेषु (घ) कर्णेषु

ii) हेयम् किम्? अकार्यम्।

(क) ग्राह्यम् (ख) देयम् (ग) कार्यम् (घ) त्याज्यम्

iii) किं किम् उपादेयम्?

(क) दानयोग्यं (ख) अनुकरणीयम् (ग) धावनीयम् (घ) करणीयम्

iv) एक: एडक: महानसं प्रविशति स्म।

(क) अश्व: (ख) मेष: (ग) वानर: (घ) सूपकार: